विद्रता, स्त्री, क्षुद्ररोगभेदः। इति मेदिनी॥ तल्लक्षणं यथा,—
"विद्रतास्यां महादाहां पक्वोडुम्बरसन्निभाम्।
विद्रतामिति तां विद्यात् पित्तोत्थां परिमण्ड-
लाम्॥"
परितः शोथवतीम्॥ *॥ अस्याश्चिकित्सा।
"विद्रतामिन्द्रवृद्धाञ्च गर्द्दभीं जालगर्द्दभम्।
पैत्तिकस्य विसर्पस्य क्रियया साधयेद्भिषक्।
पाके तु रोपयेदाज्यैः पक्वैर्म्मधुरभेषजैः॥"
इति भावप्रकाशः॥
(विवृत्तेति क्वचित् पाठः॥)

विद्रताक्षः, पुं, (विद्रते अक्षिणी यस्य।) कुक्कुटः। इति हेमचन्द्रः॥

विद्रतिः, स्त्री, व्याख्या। विपूर्ब्बवृधातोः क्तिप्रत्ययेन निष्पन्नमिदम्। विवरणम्। यथा,—
"शक्तिग्रहं व्याकरणोपमान-
कोषाप्तवाक्याद्व्यवहारतश्च।
वाक्यस्य शेषात् विद्रतेर्व्वदन्ति
सान्निध्यतः सिद्धपदस्य वृद्धाः॥"
इति मलमासतत्त्वम्॥

विवृत्तं, त्रि, (वि+वृत्+क्तः।) चलितम्। यथा,—
"विवृत्तपार्श्वं रुचिराङ्गहारं
समुद्वहच्चारु नितम्बरम्यम्।
आमन्द्रमन्थध्वनिदत्ततालं
गोपाङ्गनानृत्यमनन्दयत्तम्॥"
इति भट्टिः॥
विवृत्तं तिर्य्यक्चलितं पार्श्वं यत्र। इति तट्टीका॥

विवृत्तिः, स्त्री, चक्रवद्भ्रमणम्। घूर्णनम्। विपूर्ब्बवृतधातोः क्तिप्रत्ययेन निष्पन्नमिदम्॥ (विविधवृत्तिः। यथा, भागवतटीकायां श्रीधरः।१।६।१०।
"विश्वसृजां विवृत्तये त्रिविधवृत्तिलाभाय॥")

विवेकः, पुं, परस्परव्यावृत्त्या वस्तुस्वरूपनिश्चयः। प्रकृतिपुरुषयोर्व्विभागेन ज्ञानं इत्यन्ये। इति भरतः॥ तत्पर्य्यायः। पृथगात्मता २। इत्यमरः॥ विवेचनम् ३। इति शब्दरत्नावली॥ पृथग्भावः ४। इति धरणिः॥
"विवेको वस्तुनो भेदः प्रकृतेः पुरुषस्य वा॥"
इति जटाधरः॥
यथा। नित्यानित्यवस्तुविवेकस्तावत् ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिलमनित्यमिति विवेचनम्। इति वेदान्तसारः॥ (यथा, मनौ। १। २६।
"कर्म्मणाञ्च विवेकार्थं धर्म्माधर्म्मौ व्यवेचयत्॥")
जलद्रोणी। विचारः। इति मेदिनी॥ (यथा, मनौ। १। ११२।
"तस्य कर्म्मविवेकार्थं शेषाणामनुपूर्ब्बशः॥")

विवेकिता, स्त्री, (विवेकिन्+तल्।) विवेकित्वम्। विवेकिनो भावः। यथा,—
"यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता।
एकैकमप्यनर्थाय किमु तत्र चतुष्टयम्॥"
इति हितोपदेशः॥
(यथा, याज्ञवल्क्ये। ३। १५६।
"आचार्य्योपासनं वेदशास्त्रार्थेषु विवेकिता॥")

विवेकी, [न्] पुं, (विवेकोऽस्यास्तीति। विवेक+इनिः।) देवसेनराजपुत्त्रः। यथा,—
"देवसेनोऽपि केशिन्यां जनयामास पुत्त्रकान्।
सप्त शृणुत तान् यूयं नामतः कीर्त्तितांस्तथा॥
सुमना वसुदानश्च स्तवशग्यवनः कृती।
नीलो विवेकीत्येते वै सर्व्वशास्त्रविशारदाः॥"
इति कालिकापुराणे भैरववंशानुकीर्त्तने ९० अध्यायः॥ विचारकर्त्ता। इति मेदिन्यां विवेकशब्दार्थदर्शनात्॥ विवेकविशिष्टे, त्रि॥ (यथा, मार्कण्डेये। ६६। ३४।
"इष्टाद्दष्टांस्तथा भोगान् वाञ्छमाना विवे-
किनः।
दानानि च प्रयच्छन्ति पूर्त्तधर्म्मांश्च कुर्व्वते॥")

विवेचकः, पुं, (वि+विच्+ण्वुल्।) विवेचनकर्त्ता। विवेचयति य इत्यर्थे णकप्रत्ययेन निष्पन्नमिदम्॥

विवेचनं, क्ली, (वि+विच्+ल्युट्।) विवेकः। इति शब्दरत्नावली॥ (यथा, हरिवंशे भविष्यपर्व्वणि। ४३। १८।
"विदद्भिर्गीयसे विष्णो त्वमेव जगतीपते।
इच्छया सर्व्वमाप्नोषि इष्टादृष्टविवेचनम्॥")*॥
निर्णयः। यथा, मनुः। ८। २१।
"यस्य शूद्रस्तु कुरुते राज्ञो धर्म्मविवेचनम्।
तस्य सीदति तद्राष्ट्रं पङ्के गौरिव पश्यतः॥")

विवेचनीयः, त्रि, विवेच्यः। विवेचितव्यः। इति विपूर्ब्बविचधातोरनीयप्रत्ययेन निष्पन्नमिदम्॥

विब्रु(ब्रू)वन्, [त्] त्रि, (वि+ब्रू+शतृ।) विरुद्धवक्ता। यथा,—
"यो न भ्राता पिता वापि न पुत्त्रो न नियो-
जितः।
परार्थवादी दण्ड्यः स्यात् व्यवहारेषु विब्रुवन्॥"
विब्रुवन् विरुद्धं ब्रुवन्। इति व्यवहारतत्त्वम्॥

विवोढ़ा, [ऋ] पुं, (वि+वह+तृच्।) वरः। पतिः। इति हेमचन्द्रः॥

विव्वोकः, पुं, स्त्रीणां शृङ्गारभावजा क्रिया। इत्यमरः॥ अभिमतवस्तुप्राप्तावपि गर्व्वादनादरः सापराधस्य च संयमनं ताड़नञ्च विव्वोकः। यदुक्तम्।
"गर्व्वाभिमानादिष्टेऽपि विव्वोकोऽनादरक्रिया।"
तथा।
"अभिमतवस्तूपहृतावपि गुरुगर्व्वादनादर-
स्तन्व्याः।
स्खलति प्रियस्य हृदयं संयमताड़नमयन्तु
विव्वोकः॥"
इति भरतः॥
"विव्वोकस्त्वतिगर्व्वेण वस्तुनीष्टेऽप्यनादरः।
न त्वराहर्षवाणादेर्दयितागमनादिषु॥"
इति सारसुन्दरी॥
"इष्टेऽपि गर्व्वमानाभ्यां विव्वोकः स्यादनादरः॥"
इत्युज्ज्वलनीलमणिः॥

विश, ओ श प्रवेशे। इति कविकल्पद्रुमः। (तुदा०-पर०-सक०-अनिट्।) श, विशति। ओ, अविक्षत्। विवेश कश्चिज्जटिलस्तपोवनम्। विपराजिपरिव्यवक्रीनिविशेत्यादिनात्मनेपदविधानेऽपि भर्त्तुरङ्के निविशती भयादिति रघौ। केवलात् शतृप्रत्ययं विधाय पश्चादुपसर्गयोगादिति दुर्घटवृत्तिः। निशब्द इह उपसर्गप्रतिरूपको वा। यस्मादिन्वमिदं सर्व्वं तस्य शक्त्या महात्मनः। तस्मादेवोच्यते विष्णुर्व्विशधातोः प्रवेशनादिति पुराणे विष्णुशब्दव्युत्पादनात् मूर्द्धन्यान्तोऽयमिति केचित् तच्चिन्त्यम्। तालव्यान्तस्यैव सर्व्वसम्मतत्वात्। इति दुर्गादासः॥

विशं, क्ली, (विश+कः।) मृणालम्। इत्यमरटीकायां रायमुकुटः॥ (तत्पर्य्यायो यथा,—
"पद्मनालं मृणालं स्यात्तथा विशमिति स्मृतम्।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

विशंवरा, स्त्री, (विशं मनुष्यं वृणोतीति। वृ+अच्। अभिधानात् द्वितीयाया अलुक्।) पक्षी। इति राजनिर्घण्टः॥

विशकण्ठी, स्त्री, (विशमिव कण्ठो यस्याः। विशकण्ठ+ङीष्।) बलाका। इति राजनिर्घण्टः॥

विशङ्कः, त्रि, विगता शङ्का यस्य बहुव्रीहिः। शङ्कारहितः। (यथा, रघुः। २। ४१।
"धनुर्भृतोऽप्यस्य दयार्द्रभाव-
माख्यातमन्तःकरणैर्व्विशङ्कैः॥")

विशङ्कटः, त्रि, (वि+"वेः शालच्छङ्कटचौ।" ५। २। २८। इति शङ्कटच्।) विशालः। इत्यमरः॥ (यथा, भट्टिः। २। ५०।
"विशङ्कटो वक्षसि बाणपाणिः
सम्पन्नतालद्वयसः पुरस्तात्॥"
भयानकः। यथा, कथासरित्सागरे।१०८।१०७।
"मांसासृङ्मत्तवेतालतालवाद्यविशङ्कटः।
अभून्नृत्यत्कबन्धोऽसौ भूतप्रीत्यै रणोत्सवः॥")

विशदः, पुं, (वि+शद्+अच्।) श्वेतवर्णः। इत्यमरः॥ (जयद्रथपुत्त्रः। यथा, भागवते। ९। २१। २३।
"हस्त्वायस्ततस्तस्य पुत्त्र आसीज्जयद्रथः।
ततसुतो विशदस्तस्य स्येनजित् समजायत॥")

विशदः, त्रि, (वि+शद्+अच्।) विमलः। इति हेमचन्द्रः॥ (यथा, रघुः। ४। १८।
"प्रसादसुमुखे तस्मिन् चन्द्रे च विशदप्रभे।
तदा चक्षुष्मतां प्रीतिरासीत् समरसा द्वयोः॥")
व्यक्तः। इति मेदिनी॥ (यथा, रघुः। ८। ३।
"विशदोच्छ्वसितेन मेदिनी
कथयामास कृतार्थतामिव॥")
शुक्लगुणयुक्तः। इत्यमरः॥ (उज्ज्वलः। यथा, माघे। ८। ७०।
"स्वच्छाम्भःस्नपनविधौतमङ्गमोष्ठ-
स्ताम्बूलद्युतिविशदो विलासिनीनाम्।
वासश्च प्रतनु विविक्तमस्त्वितीया-
नाकल्पो यदि कुसुमेषुणा न शून्यः॥")